त्यासा रस्येत्यकृतं न रूपि विघटितं स्यात्। वकुपुरीति बद्धाः पुर्यो येषां इति बकुवीला वृकल रबूः पथामानन्तद्वत्यकारः समासांतः आश्रः समासांतो
ऽरनिबत्यान्लकवीत्। विमलाद्योर्येषां तानि विमलादि विदिनानि इदन्तेषु लेण स्यन्नुमो वकोशोऽयदन्तुगिन्नेपुंसके सूपूर्विघन्तेपि गिल्लेक्षण स्यावकोऽत्रा
यदुगिदन्नपुंसकं गोमान्यवमान्। उगितो झलंतस्य नपुंसकस्याभ्यनयप्रसंगे परत्वादने नैव नुम्भवति। अस्क। कृते पुनः प्रसंगाविज्ञा
नादुगिल्लु ~~सायकलो यदुगिदन्नपुंसकंगोमान् भवत्~~ स णो नुम्नप्राप्नोति। कथं पुनरेकं अंत्यमचमपेस्यानेकस्य परत्वं भवति। मानाम
सं भूत तत्रयोगो। विधानकालेतु सं भवति। यथा पचतीति ल्हः रापश्च। तत्रनुदंति नुदंति इत्यत्र परस्य नकारस्यानुस्वार परसवर्णयोः कृत
योर्द्वयोर्नकारयोः श्रवणं प्राप्नोति। न व्यंजनपरस्यैकस्यानेकस्य वा तुल्यजातीयस्य श्रवणं व्यंजनस्य प्रति विशेषोऽस्ति। इदन्तर्दिकु
र्वंति रूषंतीतिपरस्य ~~पर~~नुमोऽनुस्वार परसवर्णयोः पूर्वस्यान्त्यपरत्वादनुस्वार परसवर्णे ~~सि~~ स्त इत्युट्कु र्वाड् नुम् व्यवायेपि णा
त्वं प्राप्नोति। यदापुनरेको नुम् तदा तस्यानुस्वारः श्रवाप्नोऽपि प्रतिणत्वं वा तत्र णत्वस्यासिद्धत्वादनुस्वारे कृते परसवर्णस्यासिद्धत्वाभ
ताभावः सिद्धः। तस्मादुगिल्लक्षणप्रतिषेधो वक्तव्य इत्याशंक्याह। उगितो झलंतस्येति। सद्धृतेति न्यायोऽश्रयित व्य इत्येव कारेण
दर्शयति। अनेनैवेति। अंत्यात् पूर्वेति। रेफ ङकारयोर्मध्य इत्यर्थः। छ। इको चिभक्तौ। छ। इक इति किमिति। सर्वत्रे यदृढ्यस

ति *

स्य

णंतदत्रैव कर्तव्यम्। नपुंसकस्य झलचः। अचोऽचीति। तेन हलन्तस्य न भविष्यति। संख्याक्षरान्तं तु नपुंसके नास्तीति प्रश्नः। अतएवाह दंतं
त्यक्त्वा हरति न हलन्तं। अचीति किमिति। त्रपुष्यामित्यादौ हलादौ सत्यपि सुपि स्वादिष्विति पदसंज्ञायां सत्यां नलोपः प्रातिपदिकां-
20 तस्येति नलोपे नास्तु नुमिति प्रश्नः। इतरोऽपविदिताभिप्राय आह। उत्तरपदार्थमिति। अस्थिदधिसक्थ्यक्ष्णामनङ्विं यथा स्यात्। हलादाव-
२० स्थिभ्यामित्यादौ माभूत्। पुनश्चोदयति। यद्येवमिति [illegible] परिहरति। इहापीति। हे त्रपो इति। अत्र प्रागेव गुणान्नुमः प्रसंगः। गुणो हेऽ- २०
नि गंतत्वादन्तरंगः। स्यादेतत्। अस्त्वत्र नुम्। स्वमोर्लुकि कृते सुबंतं पदमिति पदसंज्ञायां नलोपो भविष्यतीति। नत्वाह। नङिसंबुद्ध्योरि-
ति। नन्वित्यादि। एवकाराभिन्नक्रमः प्रतिषेधेन संबध्यमान औपचारिकमपि विभक्तेरस्तित्वं प्रतिषेधतीति। द्विविधं विभक्तेरस्तित्वं।
मुख्यं औपचारिकं च। तत्र मुख्यं श्रूयमाणायाः इतरत्तु नलुप्तायाः प्रत्ययलक्षणेन। तदिह लुप्तत्वात् मुख्यं तावन्नास्ति। प्रत्य-
यलक्षणप्रतिषेधादौपचारिकमपि नास्त्येव। तत्राविभक्त्या बुध्यमानो नुम्कः प्रसंगो यस्सर्वथैवासत्यां विभक्तौ स्यात्। नैव प्राप्नो-
ति। नार्थोऽग्रहणेन। एतदेवेत्यादि। अन्यथा ● ह्यग्रहणं न कुर्यात्। कृतं तु ज्ञापयति। अत्रेगंतेन नपुंसके संबुद्धिविषये प्रत्ययलक्षणप्र-
तिषेधो न भवतीति। तथा चेत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति। संबुद्धौ चेत्यधिकृत्य जस्वस्य गुण इति विधीयमानो गुणः संबुद्धिगुणः।।

तौंबुरवमिति। विकारे ओरन्त्र। इकोचीत्यादिइको ऽचीत्युच्यते। व्यंजनादेशमाहृत्वं त्रपुभ्यां त्रपुभिः। अस्त्र नलोपो भविष्यति। नलोपः
प्रातिपदिकांतस्येति नलोपो भविष्यति। स्वरः कथं। पंचत्रपुभ्यां पंचत्रपुभिः। इगंतकालकपुरद्विगोरुत्तरपदे इत्यादि स्वरो भवतीति। एषः स्वरो न
प्राप्नोति। नुमिसति निगंत्वादितात्। लोपे कृते स्वरविधौ नस्यासिद्धत्वादिगंतत्वमेव। स्वरो वै श्रूयमाणेऽपि नुमि कि न भविष्यतीति वैः
शब्दोऽसमायां। श्रूयमाणेऽपि वै नकारे स्वरो भवति। पंचत्रपुणो। पंचत्रपुणः। यत्र शास्त्रवचनेन सद्भावो न प्रत्यक्षेण। तत्र किंन
भविष्यति भविष्यत्येव। किंपुनः कारणं श्रूयमाणेऽपि नुमि स्वरो भवति। समुदायभक्तो नुम् न इति नेदं तरपदस्येगंतता मय
हेतुं। यद्विवांतरंगः स्वरः प्रागेव विभक्तिरुत्पत्तेर्भविष्यति। इकूतर्दिअस्थ्याभ्यां अग्निराभिरिति। अस्थिरिभ्यामिति स्थिते नुमि कृते
तेनैनव्यवधानादृायो हल्लोपात्वं न प्राप्नोति। नलोपे कृते तु विधौ नस्यासिद्धत्वा व्यवधानमेव। संघातभक्तोऽपि नुमृतमेव
नव्यवदध्याऽत्रैवं तु व्यवधात्येव। अथापि अंगाधिकारे विहितं तस्य तदुत्तरपदस्येति रै शब्दांतस्यांगस्यात्वविधानान्नास्ति नुमां
गस्य यौं व्यवधानं। तथापि निर्दिश्यमानस्यादेशा भवंतीति रैशब्दस्य व्यवधानमेव। ~~[illegible]~~ अथाप्यंगस्यात्वमेव मपिनु

स्य १४ र्मनिल्यबूलोपे पें नमी। नुमा व्यवधानं श्राप्यापि भवतीत्यर्थः॥ विनंकि विधानदशायां पदत्वंनं तर्यतन्त्राश्रीयते न तादेशविधा

नुमएवात्वं प्राप्नोति। तत्र एवं यणिसति अतिपभ्यामिति स्यात्। तथाविपति सूभ्यां ब्राह्मणकुलाभ्यां इत्यत्रापि पत्रिभ्यांइति स्थितेति स्थभावोन नदशाया

२१ स्यात्। नुमाव्यवधानात्। नलोपेपिकृतइत्यादिपूर्ववत्। नैषदोषः। रायात्वेति स्थभावश्च व्यवधाना न्नुमा अपिभवतः। वो व्यवधानादितिभावः मिति भावः।२

नुमा अपीत्यत्र संहिताया अविवक्षितत्वात् सवर्णदीर्घत्वं नकृतं। अन्येमध्येहि शब्दं पठंति। अपिशब्देनैतत्सूचयति प्रकारांतरेणाप्यात्वंतिसं

२१ मा वोसि ध्येतदिति। नत्वकथमतिरिभ्यां इतिस्थिते नुमात्वयोरुभयोर्नित्ययोःपरत्वात्वं। एवंतिस्थभावः। तत्र सकृद्गति न्यायाश्रयेणे नुमभा २१

भावः। सत्यपि नुमि न कश्चिद्दोषः। एवं तर्हि नुम नुटो विप्रतिषेधार्थमङ्ग्रहणं कृतं। ऊरुस्वनघापो नुडित्यस्यावकाशः। अग्नीनां। वायूनां

नुमोवकाशस्त्रपुणे। जतुने। त्रपूणां। जतूनां इत्यत्रोभयप्रसंगे विप्रतिषेधेन नुडिष्यते। नामीतिदीर्घो यथास्यादिति। सर्वविप्रतिषेधो

५१ ऽङ्ग्रहणेसत्युपपद्यते। द्वयोरेनित्यत्वेन तुल्यबलात्। असत्यङ्ग्रहणे कृताकृतप्रसंगित्वान्नित्यत्वान्नुमेवस्यात्। एतदपि द्वयोरनं

द्रूषयतिनुड्वाच्य इति। क्रियमाणेप्यङ्ग्रहणे नुडामिवाच्यः। वचनेनैवसाध्यः॥ अन्यथापरत्वान्नुमेवस्यात्। नतश्चाङ्ग्रहणं कर्तव्यं। पूर्व

विप्रतिषेधश्च वक्तव्य इति यत्नद्वयमाश्रयणीयं। तत्राङ्ग्रहणमहत्वा एक एवनुड्यो यत्नः कर्तव्य इति भावः। इदं तर्हि प्रयोजनं मनेनयत्

नेन नुटिकृते तत्रैवानजादौ नुम् मा भूदिति। असति लोपो भविष्यति। नलोपस्यासिद्धत्वान्नामीतिदीर्घत्वं न स्यात्। माभूदेवंनोपधा इति वक्ष्यति। इत

तर्हि शुचीनां इन्हन्पूषार्यम्णां शौ सौ चेति एतस्मान्नियमाद्दीर्घत्वं न स्यात्। प्रतिपदोक्तस्यैवेन्नन्तस्य यद्ग्रहणं लाक्षणिकस्यापि एवं प्रत्याख्या
तेऽत्र हूणशौयौ जनमाह। उत्तरार्थमिति। तुशब्दस्तर्हि थोयिष्कृतेरत्रास्य प्रयोजनं तर्हि तत्रैव कर्त्तव्यमते आह। इह किं विदिति। तुशब्दस्य
यणनकृतः। इकोऽसवर्णे शाकल्यस्येति प्रकृतिभावात्। त्रपो कृति इत्यत्र तु असंबुद्धौ शाकल्यस्योऽतो व नार्षे इति प्रकृत् घत्वा हवादेशाभावः॥
केचिदत्र हेत्रपो हे त्रपुइति द्विरूपमिच्छन्ति। प्रत्ययलक्षणप्रतिषेधस्यानित्यत्वं ज्ञाप्यते। न तस्मिन् विषये सर्वथाभाव इति वदन्तः॥
तथा च भाष्ये हे त्रपो हे त्रपु इति द्वयमप्युदाहृतं। अन्ये तु हे त्रपुइति प्राप्ते हे त्रपो भवतीति भाष्यं व्याचक्षाणा नित्यमेव गुणमि
च्छन्ति। तथा च हे त्रौ गुण एवोदाहृतः॥ ६॥ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य॥ ७॥ नपुंसकस्येति वर्त्तते। वर्त्तं तत्प्रकृ
तं न हि हि भाषितपुंस्कमित्यनेन संबध्यते। तथा सति संबध्यते। पुंवदिति। पुंशब्देन तुल्यमित्यर्थः। केन पुनः प्रकारेण पुंस्त्वेन
तुल्यं वर्त्तत इत्यपेक्षायामाह। यथेति। तुस्वकृत्वयोरभावः पुंशब्दे दृष्टः। तद्द्वारेण यत्साद्दृश्यं तदिह तद्वित्क्रियते। अन्यस्यक
स्यचिन्तृतीयादिषु पुंशब्देन साद्दृश्यासंभवात्। तेनार्थात्तु स्वकृत्वयोः प्रतिषेधोऽयं संपद्यते। नन्वेवमपि प्रकृतत्वात्नुमस्

वा भावस्या(ति)देशो युक्तो नह्रस्वस्य। ततश्च ह्रस्वस्यासिद्धत्वात्तदाश्रयाणां गुणनाभावनुडौत्वानां प्रतिषेधो वक्तव्यः। गुणः।
घेर्ङिति। ग्रामण्ये ब्राह्मणकुलाय। नाभावः। आङो नास्त्रियां। ग्रामण्या ब्राह्मणकुलेन। नुट्। ह्रस्वनद्यापो नुट्। ग्राम-
ण्यां ब्राह्मणकुलानां। औत्वं। अच्च घेः। ग्रामण्यां ब्राह्मणकुले। नैष दोषः। अतिदेशसामर्थ्याद्ध्रस्वाभावोऽप्यतिदि-
श्यते। अन्यथा प्रतिषेधमेव गालवस्य विदध्यात्। ग्रामणि ब्राह्मणकुलमिति। नपुंसके ह्रस्वत्वं भवति। अतस्तद्-
२२ भावोऽतिदिश्यत इत्यनेन दर्शितं। परिशिष्टमुदाहरणं। शुचि ब्राह्मणकुलमिति। प्रक्रमाभेदाय पद्दर्शितं। प्रत्युदाहरणे- २२
षु यथायोगं नुम्ह्रस्वौ भवतः। पीलु फलमिति। विकारेऽत्र फले लुक्। समानायामाकृताविति तस्यैव विवरणं। तुल्ये प्र-
वृत्तिनिमित्त इति। यद्योगात्तद्द्रव्ये शब्दनिवेशस्तत्तस्मिं प्रवृत्तिनिमित्तं ग्रामनयनादिति। अस्यैवं प्रवृत्तेः किमायातं। तत्रा-
ह। इहत्विति। पुंसि शब्दस्य प्रवृत्तिस्तत्र वृक्षावान्तरजाति~~स्स्य ग्रीहतात्त थापि नासौ फले प्रवृत्तिनिमित्तं साधु~~ निमित्तमि-
त्यर्थः। फला इति नपुंसक इति। प्रवृत्तिनिमित्तं शब्दस्येत्यनुषंगः। फलाहृतिः फलापरजातिः। तत्र यद्यपि पीलोः।

स्थ्याद

फलमितिव्युत्पत्तौ वृक्षावांतरजातिरप्यंगीकृता। तथापि नासौ फले प्रवृत्तिनिमित्तं किं तर्हि फलावांतरजातिरेवेति प्रवृत्तिनिमित्तं॥
तदेतदेवमित्यादि स्त्रियाः पुंवदित्यत्रैव व्याख्यातं। तत एवावधार्यं। किलालपेनेति। अत्र क्वनिष्टत्तावातो धातोरिति लोपः
स्यात्। ७॥ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। ७। अनङो द्वितीयोकारस्तूच्चारणार्थः। ङकारोंतादेशार्थः॥ अस्थ्यादयो
नि वृषपस्या निसंतस्येत्याद्युदात्ताः। शेषमनुदात्तं। तत्रांतर्यतोनुनांदात्त आदेशो प्राप्त उदात्तवचनं। अस्थ्नातादाह्वल्लो
पान। इत्यकारलोपे परे अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वार्थं। विभाषा ङिश्योरित्यल्लोपाभावपक्षे तू
दात्तस्योकारस्य श्रवणं भवति अस्थनीति। तथा च्छंदस्यपि दृश्यत इत्यत्रैवोदाहृतो वा आस्थ्नामोरिति। एते रदिनरित्या
दि। अत्रांगाधिकारे तस्य च तदुत्तरपदस्य चेति। तदंतस्य तावद्ग्रहणं भवति। तथा नपुंसकस्येत्यत्रैतेनुवृत्तस्य श्रुत
त्वादस्थ्यादीनां विशेषणं न प्रकृतस्यांगस्य। तेनानपुंसकस्यापि तस्य ग्रहणं भवति। किमर्थं पुनर्नपुंसकत्वेनास्थ्यादयो विशेष्यंते।
यदृच्छाशब्दानां मा भूत्। दधिर्नाम कश्चित्तेन दधिनेति। नैतदस्ति प्रयोजनं। अभिव्यक्तपदार्था ये स्वतंत्रा लो

कृविशिष्ठा ताः। छ। शास्त्रार्थस्तेषु कर्त्तव्यः शावै द्वेषु न तदुक्तिषु। एवं तर्हि नपुंसकस्य त्यन्तु ह्रस्वस्याच्चयत्र ह्रस्वी नमा
त्रं अत्र कृतं। एतैरस्त्र्यादिभिः नपुंसकैरिति। छ। छंदस्यपि दृश्यते। छ॥ छंदसि वेत्येव सिद्धे अपि दृश्यत इत्येतत्सर्वो
पाधि व्यभिचारार्थं। अन्यथाऽरंभसामर्थ्यात्कस्य चिदेव व्यभिचारः शंक्येत। तदिदं उक्तं यत्र विहितं ततोऽन्यत्रापि दृश्य
त इति। अस्थ्नि चं नभिति। अनङि कृते अनोनुडिति मनुपो नुट्। अनङो नकारस्य लोपः। छ। इवर्णादिवचने। छ। असी इ
ति। अस्थि औ इति स्थिते। औङः शी भावः पूर्वस्य कारः। तत्र प्रथमयोः पूर्वसवर्णदीर्घ इति दीर्घस्य ई दीर्घाङ्जसि वा
तिनित्येत्रानिषेधे प्राप्ते वा छंदसीपूर्वो पूर्वसवर्णदीर्घत्वं॥ अकः सवर्णे दीर्घ इति वा दीर्घत्वं। ननु वासत्यपि अस्मिन्वच
वने पूर्वसवर्णदीर्घत्वेनैव सिद्धं। नात्र पूर्वसवर्णदीर्घत्वं प्राप्नोति। परत्वान्नुमा बाध्यत। एवं तर्हि छंदसि नपुंसकस्य पुं
वद्भावो वक्तव्यः। मधोस्तृप्ता इवासत इत्येवमाद्यर्थं। तेन पुंवद्भावेन नुमि शीभावे चासति पूर्वसवर्णदीर्घत्वेनापि सिद्धं। अ
क्षी इति। सत्यं रूपं सिद्धं स्वरस्तु न सिध्यति। अक्षिशब्दो नान्विषयस्यानिसंतस्येत्याद्युदात्तो वा त। तेन च पुंवद्भावेन स्वरस्या

प्रभावातिदेशइष्यते। तस्मात्स्वरस्यार्थमत्रापीकारएव विधेयः॥ ६॥ नाभ्यस्ताच्छतुः॥ ६॥ इति। अभ्यस्तयोरात इत्याकारलो
पः। ऽऽक्षदितयो दोऽक्षित्यादयः। षट्। तथ्यभ्यस्तसंज्ञाकथं पुनश्चतुर्जि यौगैर्व्यवहितं [redacted] स्यनुमोयं प्रतिषेधः शक्यो विज्ञातुमि
त्याह। शतुरनंतरो न विहित इति। अनंतरईकारः शत्रंतस्य न विहितः। एवं तदनंतर इति। यावद्विहिता न्वेषणे नुमिपर्यवसानं।
६॥ आच्छीनद्योर्नुम्॥ ६॥ अवर्णांताद्गादुत्तरस्य शतुरिति। सूत्राक्षरैस्तावदयमर्थः प्रतीयत इति एवं व्याख्यातं। न पुनरयं
व्यवस्थितः सूत्रार्थः। दूषणस्य वक्ष्यमाणत्वात्। तस्मान्नात्र दर्शितविषयं दूषणं शक्यं कैवक्तुमिति विषयप्रदर्शनपरं द्रष्टव्यं।
यांतीकुलेइति। नपुंसकाच्चेत्यौङः शीभावः। यांतीब्राह्मणीइति। उगितश्चेति ङीप्। करिष्यंतीति। लृट्। लृटः सद्वा। स्य
तनोःस्यइतीट्। अत्रेत्यादिचोद्यं। अंतरंगत्वं पुनरेकादेशस्य शत्रंतमात्रापेक्षत्वाद्। नुमस्तु बहिरंगत्वं शीनद्योरुपाश्रयापे
क्षत्वात्। व्यपवर्गो भेदः। इदमवर्णांतमिंगमयं वा तदुप्रत्यय इत्येवं रूपः। सएकादेशो [illegible] नास्ति। क्षीरोदकवत्। तथा
क्षीरोदके संपृक्ते न ज्ञायते इयत्क्षीरमियदुदकं अमुष्मिन्नवकाशे क्षीरममुष्मिन्नुदकमिति। अवर्णांताद्गादुत्तरस्य
शतुरिति न युज्यते। वक्तुमिति। यथा पूर्वं अवोचधास्तथा न युज्यत इत्यर्थः। तथाहि सर्वत्रैवावर्णानिर्दिष्टा भवितव्यं। कैचित्तु

×न भवति। यथोपसर्गाद्ध्रस्व ऋकारेऽत: ओ आवते। एत्यधिष्ठि। अभीयादिति। इत्यादि अवर्णान्तमंगं शत्रावेतदुभयं युगपदाश्रीयत इति नास्येतादिवद्भावः। ३ ×

का अददती धुनीति कश्चित् स्नुनाऽरु क्नातीति तुदंतीत्येकादेशेन। त्तुनतीत्यात्कां दोष्मा भ्यस्त्व योरात इत्याकारलोपेन। स्यादेतत्

एकादेशविशिष्टेऽतादिवत्‌भावे नव्य पवर्गो भविष्यतीति। तत्राह। उभयत आश्रय इति। यत्र हि पूर्वपरयो उभयं युगपदाश्रीयते। त आ२

त्रांतवद्भावो। एवं तर्हि उच्यते वेदवर्णीता दंगादुत्तरस्य शतुरिति। न वसं प्रत्ययेवं विधः शतो कश्चित्सं भवति। तत्र भूतपूर्वगति

राश्रयिष्यते। एवं यः शतावर्णात्पर आसीदिति तत्राह। भूतपूर्वगत्याश्रयणे वेति। समाधिः समाधानं परिहारः। अ

२४ वर्णान्ताच्छब्दादिति। अंगात्किंतु द्रष्टव्यं अन्यथा ददतीत्यादावपि प्रसंगः। न वति ह्यत्रापि शत्रवयववायी दकारात्परस्तकारः। कथं पुनरव

र्णान्तस्य अंगत्वं। एकादेशस्यांतवद्भावात्। नो हि तदानीं परं प्रत्ययादित्वं अपेक्षितं। तकारस्य कस्कृत: स्वयमेव शत्रवयवत्वात्। एवं भूत

तेन तकारेण पुनरस्यैतदंतविधिः। अंगस्य त्वेतदन्ताप्यावर्तते। अपरे पुनर[illegible]ति अत्रापि पक्षे युगपदुभयं नाश्रीयते किंतु।

क्रमेण तस्यैतादिवद्भावः। ननु तु ददतीत्यादावंतादिवद्भावाद वर्णान्तमंगं भवतु तथापि नातः परे शीन ध्रौतकारेण व्यवधाना

दिति अत आह। न जेति। वक्ष्यमाणो नुम्‌ वतिषेधेन संबद्ध इति। तदन्तु दत्तावि हापि प्रतिषेधे एव विकल्प्यते। न शीन घोवी

ग३

नुम्भत्यवर्णतादिति केन पुनः प्रसंगः। इदमेव ज्ञापकं स्यात्। अस्ति शीनद्योर्नुमिति। तत्तश्च कुर्वतीत्यादावनवर्णतान्नित्यं नुमः
प्रसंग॥ मेवं विज्ञायीति नुम्ग्रहणं॥छ॥ शप्श्यनोर्नित्यं॥छ॥ इत्येतयोः शतुरिति। एतयोः संबंधीयः शता तस्येत्यर्थः। सं
बंधश्च निमित्तमिति भावः। कुचिन्नु संबंधिन इत्यपि पठ्यते। नित्यग्रहणमित्यादि। ननु शारभसामर्थ्यादेव नित्यं भविष्यति। तत्राह।
इहेति॥छ॥ सावनडुहः॥छ॥ इह खनुडनडुहोरामुदात्त इत्यामागमः सर्वनामस्थाने विधीयमानः सोरन्यत्र सावकाशो निर्वकाशेन
नुमा बाध्येत। तथा संबुद्धरन्यस्मिन् सावकाशो नुम्संबुद्धौ विशेषविहितेनाम्संबुद्धावित्यनेनामा बाध्येत। तादृशं क्वाह। अत्र
केचिदिति। कथं पुनरादित्यस्यानुदात्तौ सत्यामाममाः कृतयोर्नुम् भवति। न पुनर्वैपरीत्ये वा सावनडुहित्यत्र सन्निहितो का
रस्तत्परः स्यात्। उच्यते। एवं सति मिदचोऽन्त्यात्पर इति परिभाषाबाधात्। न चाबाधेनोपपत्तौ सत्यां बाधो न्याय्यः।
तत्र यथा परिभाषा न बाध्यते। आदित्यन्तु हन्ति श्वस्तता भवति। तथा च वक्तव्यं। यदि वाम मोऽर्धुमुश्चस्यान्ते दंडभयं अनुगृह
हीतं स्यादिति कृतयोरेव तयोर्नुम् भविष्यति। आममौ च न बाध्येते इति न केवलममेव न बाध्यते अपि तु आममावुभावपि न

रकृतयोर

बाध्येतइत्यर्थः। यथा आम्नन बाध्यते तथा अमिति भावः। न पुनर मो नुमा बाधशंका। अमो विशेषविहितत्वात्। आमम्भ्यां नुमि
ति। न बाध्यत इति विपरिणामेनानुषंगः। अत्रापि यथा आमा न बाध्यते तथा अमापीत्यर्थः। न पुनरामो नुमो बाधशंका। तस्य सामा
न्यविहितत्वात्। अपरे त्वित्यादि। इष्टं तीति वचनादिष्टिरेवेयमिति केचित्। अन्ये त्वाहुः सामान्यविशेषयोः सन्निधौ बाध्यबाधकभावः।
इह तु अनेकेन योगेन व्यवधानं। अस्ति च संभवो यद् नयंस्यादिति। आममो नुमश्च समावेशं इति। यथेति। अत्रापि नाप्राप्ते विधि
र्वृद्धौ दीर्घत्वं आरभ्यते। अथ च संभवात् प्रकरणभेदात् समावेशः। इह तु बहूनि ब्राह्मणकुलानीति। परत्वादमि कृते पुनः २५
प्रसंगविज्ञानान्नपुंसकस्य झलच इति नुम् भवति। ६। इकस्त्वच स्वतवसां छन्दसि। ७॥ ईदूङि त्यादौ त्यदादिषु दृशो नालोचने कञ्
च्चेति किनि नुमिन्न कृते कुत्वं॥ ८। दिव औत्। ९। धातोः प्रतिषेधो वक्तव्यः। अक्षद्यूरिति। एकदेशविकृतस्यानन्यत्वाद्दूठि कृते दिवु
शब्द एवायमिति प्रसंगः। अथालधिकारात्सिद्धं। अधातोरित्यनुवर्त्तते। कप्रकृतं उगिदचां सर्वनामस्थाने धातोरिति। पदितदनुवर्त्तते नपुंसक झलचो
इत्यत्रापि संबध्येत। ततश्च काष्ठतक्षि ब्राह्मणकुलानि इत्यत्र न स्यात्। तस्माद्दशाकांतदनुवर्त्तयितुं। ततश्च धातोः प्रतिषेधं वक्तव्य वेत्या
चा

ग्रां क्वाह । द्विविति ग्रातिपदिकमित्यादि ॥ पथिमथ्यृभुक्षामात् ॥ पंथा इति । इतोत्सर्वनामस्थाने इतीकारस्याकारे सवर्णदीर्घत्वं ॥ थों
थः ॥ अनुनासिकस्य नकारस्यांतर्यतोनुनासिक आकारः कस्मान्न भवतीत्याह । स्थानिन्यनुनासिकेपीति । अत्रैव कारणमाह । भाव्य
मानोति । केचिद्भाव्यमानोण् सवर्णान्न गृह्णातीति पठंतीति तेषां अप्यण्ग्रहणं ग्राहकोपलक्षणं । तेन अकारोपि [redacted] भाव्यमानो
ग्राहको न भवति । तपरस्तत्कालस्येत्यनेन ग्रहणशंका । उक्तं हि तत्र अनणिविध्यर्थमेतदिति । स्यादेतत् । माभूत्सवर्णग्रहणं । अनु
नासिकास्य वस्तत्र उच्चारणात्सएव स्यादित्यत आह । श्रुह्रोस्य यमिति । अकारविधाने अतो गुणे पररूपत्वं स्यात् । अकारविधानं तु नका
रनिवृत्त्यर्थं स्यात् । नोपविधाने गौरवप्रसंगात् । अंतस्मादाकारो विहितः । इतोत्सर्वनामस्थाने ॥ अद्वचनं किमर्थं । ह्रस्वस्य श्रव
णं यथा स्यात् । नैतदस्ति । सोनावदकः सवर्णदीर्घत्वं भाविष्यति । अन्यत्रापि नोपधाया इति दीर्घेण भाव्यं । तस्माद्धस्वकृत आकार एव विधेयो न तु
आह । आदिति वर्तमान इति । यत्रायं विहितो कारः पूर्वेण वर्तितत्रास्य प्रयोजनं इत्यर्थः । तदेव दर्शयति । अनुक्षण इत्यत्रेति । आकारविधौ
त्वेकमेव रूपं स्यात् । दीर्घविकल्पस्तु तत्क्षणं तक्षाणमित्याद्यर्थं स्यात् । स्थानिन्यादेशवत्परकरणं सुखस्पष्टोच्चारणार्थं ॥ थोंथः ॥

थं२ थः३

पथिमथोर्सिन्। नयाह्तेत्वेयोतथोरेव थकारसज्ञावादत्रसंबंधः। आदेशोऽकारउच्चारणार्थः। स्यादेतत्। थेरंथ इतिस्त्वमस्तु आ
कारादिवर्णितोस्तु। चिशब्दस्यांथादेशः। एवंच ह्लत्वाइतोद्दितिनवक्तव्यमिति। तदपिवक्तव्यम् भु [illegible] थीदिशब्दार्थम्। ७। भ
२६ स्यटोलोपः। ८। पथ्यादिभिः प्रत्येकमभिसंबंधस्येत्येकवचनं। विरोधादिति। सर्वनामस्थाने भसंज्ञायाअभावो विरोधः॥ २६
इह न संबध्यत इति। उत्तरार्थं त्विनुवर्तत इति भावः। ८। पुंसोसुङ्। ९। असुङोङकारोंतादेशार्थः। उकार उच्चारणार्थः॥
पुमानिति पुंसुशब्दस्यागित्वान्नुम् सहितस्य ङोऽनु स्तुनिवृत्त्यापाघेतेङकारश्चिल्लोपार्थः। नकारस्स्वरार्थः। मकारेऽकारउच्चा
रणार्थः। उकारउगित्कार्यार्थः। बहुपुंसीति उगितश्च णोङीप् भवति। इत्येतदादिबोधं। प्रागेवप्रत्ययोत्पत्तेरिति। प्रत्ययः सर्वनामस्था
नं। समासस्यांतोदात्तत्वमिति। नासुङोकारस्य पुंशब्दोकारस्थानिष्टस्वरइति स्वसनधर्मिणः सकारस्य हलः स्थाने तद्धर्मोनुदात्त
आदेशः स्यादित्यर्थः। ननुवोकारस्यकृतमपिसमासस्यांतोदात्तत्वं असुङ्ङिकृतेऽनंत्यत्वान्निवर्त्स्यते। असुङः श्रांत्यत्वात्स्व वर्ति
ष्यते। नैतदस्ति। अंतरंगेस्वरेकृते बहिरंगस्यासुङोसिद्धत्वात्स्वरदृत्तस्यानिवर्तनायोगात्। तदर्थमि[illegible]त्यादिपरिहारः। अर्थ

शब्दोनिवृत्तिवचनः। तस्याभिष्टस्वरस्य निवृत्त्यर्थः। उपदेशिवद्वचनमिति। उपदेशो स्यास्तीत्युपदेशी। सकारः स यथोपदेशावस्थायां
सन्निहितस्तथा सुड्यपीत्यर्थः। ततश्च सर्वनामस्थान इति विषयसप्तम्याश्रयणीयत्वं फलं भवति। तत्र समासानन्तरमेव परत्वाद सुडि कृते पश्चादुद
त्तत्वं भवतु अस्य उकारस्य भवतीति सिद्धमिष्टं। यद्येवं पुमानित्यादौ असमासे उपदेशावस्थायां असुडि कृते प्रातिपदिकस्वरो भवतु सु
डप्येवस्यादित्यत आह। पुमानित्ययं पुनरिति। पुंशब्दे यत्ययोनिर्दिष्टत्वं। तत्सामर्थ्याद्बाधकस्तत्वं। ०। गोतोणित्।०। गाङ्कुटादिसूत्रे यावं
तः पक्षा [illegible] इत्यपितावत एव। गुणदोषाश्च। तद्दैवं यादेशपक्ष आश्रीयते। यद्यदाणिद्वद्भवतीति। परत्वात्परशब्दं यथोक्तौ तरे णापि वर्ति
वत्यर्थं गमयति। यथासिंहो माणवक इति। णिदित्येनेन सामानाधिकरण्यात्सर्वनामस्थान इति सप्तम्यन्तं प्रथमया विपरिणम्यते
ते। तत्र तत्र सर्वनामस्थानस्य णित्कार्यार्थविधेयं न स भवतीति णिति यत्कार्यं तत्सर्वनामस्थाने परे स्यादित्यर्थः। तदाह णि
त्कार्यं तत्र भवतीत्यर्थ इति। चित्रगुरिति। बहुव्रीहौ गोः स्त्रियोरुपसर्जनस्येति ह्रस्वत्वं। तत्रासति तपरकरणे गोधिकारेत एव
विध्यनुज्ञानात्सर्वे सर्वपदादेशा इति न्यायेन स्थानिवद्भावे सति गोशब्दं तत्वाणिद्भावः प्राप्नोति। तपरकरणे तु तत्कालत्वा
र्वे सति न भवति भिन्नकालत्वात्। तपरस्तत्कालस्य सत्ये ग्रहणस्य निवृत्त्वादणनाभिन्नकालत्वानियमो भवतीति मन्यते।

कथमिति। ह्रस्वस्य गुणः। जसि चेति गुणे कृते सत्यपि तपरेण तत्कालस्यापि त्वं प्राप्नोत्येवेति प्रश्नः। न च स्थानिवत्त्वविषये लक्षणज्ञाति प
दोक्तपरिभाषा तस्यैवेत्यर्थ प्रसंगात्। अंग वृत्त इत्यादि परिहारः। णिन्न भवतीति णित्कार्यं न भवतीत्यर्थः। भवतु संबन्धावेष परि
हारः। जसि त्वादेशमन्तरेणानिष्टि तत्वादंगस्य नायं परिहार इत्याशंक्याह। अथ वेति। यद्येत्यादिनार्थद्वारकं संबन्धं दर्शयति। २०
७ आनन्तर्यलक्षणे तु संबन्धे विद्र गुणशब्दादपि प्रसंगः। यदि तर्हि अर्थद्वारक संबन्धाश्रयणादेव चित्र गुणशब्दे प्रसंगः किमर्थं तपर
करणमित्याशंक्याह। तपरकरणं तु निर्देशार्थमेवेति। विस्पष्टनिर्देशार्थमित्यर्थः। अन्यथा गोरित्युच्यमाने गुणशब्दस्यापि नि
२७ र्दिश्य संभाव्येत। केचिदित्यादि। एवं पाठे प्रयोजनमाह। घोरशब्दादपीति। ये तर्ह्येवं पठन्ति तेषां घोरशब्देणिदवत्त्वं कथमित्य आ
हृ गो तइत्येतदेवेति। कथं पुनरेषं तदोकारान्तोपलक्षणे शक्यं द्रष्टुं इत्यत आह। वर्णनिर्देशेपु हीति। वृद्धिरादैच्' अतो लोप' इत्यादौ व
र्णनिर्देश एव तपरकरणं दृष्टं। तस्मादिह तपरकरणमोकारान्तोपलक्षणं विज्ञायते। छ। णलुत्तमो वा। छ। णित्कार्यं तत्र भव
तीत्यर्थः। एतेन णित्कार्यस्य पक्षे भावाद्णिद्वद्भवतीत्युच्यते। न तु पक्षे णकारस्येत्संज्ञा ज्ञाति बोधादिति दर्शयति। एवं तत्र्यप्र
वृत्तिकार्याति देशाल्लभ्यते' रकारेत्यादि। नित्य पक्षे वृद्धिरन्यत्र गुणः। प पाचेति। नित्यपक्षे वृद्धिरन्यत्र तदभावः। छ।

सखकारसंबुद्धौ ॥ अत्राविशिदित्यनेन सामानाधिकरण्यात् सर्वनामस्थाने इति प्रथमांतं तत्रोत्तरार्थं असंबुद्धावित्यस्य तिसप्तम्यंतस्योपात्तस्य यथेष्टा
न्वयस्तथा दर्शयति । असंबुद्धौ यः सणि शब्द इति ॥ अनडुहः सौ ॥ सर्वनामस्थाने प्रकरणात् संबुद्धिपर्युदासाच्च सावित्रि प्रथमैकवचनस्य ग्रहणं ।
न तु सप्तमीबहुवचनस्य । आकारविधौ सौ हल्ङ्यादिलोपो न स्यात् । एवं तर्हि सोर्ज्जोदशगोविधीयतां । एवं सिद्धे यदनडुंशब्दात् ततो ज्ञापयति अनडुः एवं
कवि कृत्वं णमस्तीति । तेन यद्वक्ष्यति संबुद्धावपि पक्षे पक्षे ऽनडुः इष्यत इति तद्दुर्बुद्धुपपन्नं भवति ॥ अडुत्वान स्युरहंसो नेतसांव ॥ असंबुद्धावि
विपक्षे ऽनडुः इष्यत इत्यादि यदुक्तं तदा गमादुष्यति । यथायो ऽमिति । संबोधने संबुद्धौ त्रयाणां रूपाणां समाहारः त्रिरूपं पात्रादिः ॥ कानि पु
नस्तानि इत्याह । सांतं अनडो भावपक्षे । नांतं नलोपाभावपक्षे । अदंतं नलोपपक्षे । न ध्यंदिनस्यापत्यं माध्यंदिनिराचार्यः । वष्टि । इच्छति । माध्यं
यामस्य साधुत्वं विंत्यमिति ऽक्षित्यादयः पडितत्रावोवाम । तथा व्याघ्रपदोऽपत्यानां मध्ये वरिष्ठो वैयाघ्रपद्य आचार्यो नपुंसके नपुंसकसंबंधि
नि इगंते हे त्रापा इत्यादौ गुणं इमिच्छतीति ॥ रत्नो कार्थह ॥ तृज्वत्क्रोष्टुः ॥ क्रोष्टुशब्दस्य नत्रु त्यथांत इति । कुशो आक्षाने । सितानिन
मिसिस्याविधात्क्रोकुशिभ्यस्तुन् । संज्ञाशब्द इति । उन्नःमयस्य संज्ञायां विधानात् । इदं बुकस्यैवेयं संज्ञा । वस्तुस्वरूपकथनं वेत
त् । अत्रानंतरं तस्येति पठितव्यं । क्रोष्टुरिति सूत्रे षष्ठी निर्दिष्टेत्याह । तृज्वद्भवतीति । तृजवत् तृज्वत् । तत्र तस्येवेति षष्ठीसमर्थाद्वतिः । तदेव
मुत्तरत्रस्य षष्ठीत्वं । तृजंतस्य यद्रूपं तद्रूपं भवतीति । प्रत्ययग्रहणपरिभाषया तृजंतस्यैव लभ्यते । अतिदेशो ऽनेकप्रकारः । निमित्तव्यप

देशतादात्म्यं शास्त्रकार्ये स्वरूपविषयः। तत्रादिसूत्रयाणाम् असंभवाद् नातिदेशः। शास्त्रस्त्रकार्यातिदेशयोश्चायं विशेषः। शास्त्रातिदेशे तेन तेन
शास्त्रेण कार्याणि भवन्ति। कार्यातिदेशे तु अतिदेशवाक्येनैवेति। तत्र च द्वयोर्विप्रतिषेधे फलविशेषः। तद्यथा कर्मवत्कर्मणा तुल्यक्रिय इति शास्त्रातिदे
शे कर्मकर्त्तरि भावकर्मणोरित्यनेन बाधित्वा स्वाश्रयं कर्तृत्वम् आश्रित्य शेषात्कर्त्तरि परस्मैपदप्रसंगः। कार्यातिदेशे त्वात्मनेपदमेव प्र
२८ रत्वाद्भवतीति। इह तु नैवंविधो विशेषः संभवतीति नेतयोर्भेदमाश्रित्य विचारः प्रवर्त्तितो भाष्ये। किं पुनरयं शास्त्रातिदेश आहोस्वि २८
९६ द्रूपातिदेश इति। तत्र शास्त्रस्य शास्त्रेण तादात्म्यासंभवमिति शास्त्रातिदेशः। शास्त्रातिदेशाश्रयान्यानुरूपातिदेशप्रसंगः। तदर्थत्वादतिदेशानामा
श्रीयेषक्ते आह। तद्विषयस्थास्त्रं न यूहत्यवातिदिश्यते अ[illegible]नाहत्य वा। यदा तु [illegible] वशास्त्रम[illegible]तिदिश्यते तदाहत्येति पक्षः। अथ कुत इदमेकवाका
र एव विवक्षितः। चकारः स्वनार्थः। तेकास्वस्त्रसिद्धां शंकां निहत्यर्थः। न च दित्यव्यमाने अप्रसिद्धयोतिदेशः शंक्येत। तस्मात्तत्र जंते
यह काऽप्युक्त इति शास्त्रं कार्यं वा तदतिदेशो नाहत्येति पक्षः। तत्राहत्येति पक्षे छन्दसि जातिदीर्घत्वमेकमतिदिष्टं स्यात्। अनडुह् गुणरप
रत्वादीन्यतिदिष्टानि। अनडुह्। अडुशानपुरुदंसोनेहसां चेत्यनङ्। सर्वनामस्थाने चासंबुद्धौ। गुणः। उरण्रपरः। रपरत्वं। एतानि नहि एतौ हलि संज्ञौ नवि न३
धीयन्ते। ननु च दीर्घत्वेऽतिदिष्टेऽनडादीन्यतिदिष्टान्येव भवन्ति। कथं। दीर्घविधावुपधाया इति वर्त्तते। असंश्चोपतिष्ठते। ततश्च ऋदितस्तु नुम्
तस्यापि दीर्घो भवतीत्यनडुहो उपधाया अचो दीर्घो भवतीत्युक्तं भवति। न चाकृतेषु नडादिषु ऋतुन्नं तस्योपधा दीर्घभाविनी संभवति। ऊसिनगुणा
।अष्ट इति बंधनस्य समासांतस्य वा अतिदेशः शंक्येत ।५

तु४ ग्रासि४ दि५ ×स्या६ यणो३

वादेशयोः कृतयोः संभवतीति। नह्येकस्माद्दरणं योगारंभं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्। अहन्निति यत्र क्रोष्टुशब्दस्य ग्रहणं कुर्यात्। अथ वा स्त्रियां वा
विभाषा तृतीयादिष्वचीत्येवमर्थं तु नस्त्र्यचः क्रोष्टुरिति वक्तव्यं स्यात्। इति गौरवं स्यात्। स्यादेतत्। अविरुद्धात् इत्यस्यानंतरं क्रोष्टुशब्दः स्त्रियां वि ष्ट३
भाषा तृतीयादिष्वचीति सदेशार्थं वक्ष्यामि नास्ति गौरवमिति। एवमपि क्रोष्टः क्रोष्टरि पंचक्रो[illegible]रौ इति न सिध्यति। नाप्यादृतो हल्यूहग
वादि[illegible]स्वरः। तृज्वत्तस्याध्ययनं तत्वात्। तदेवं [illegible]दीर्घ इति देशोऽपि नातिदेशाप्रपंचेण। [illegible]मिति न तत्सामर्थ्यादनङादीनां बाधो
पतः सिद्धिरित्याहतृ पक्षो दुष्टः एव। अथ नाहत्यपक्षः। अनाऽनङादीन्यतिदिष्टानि दीर्घत्वमनतिष्टं। नहि तद्गत इति बाधिष्यते। अथ हस्ति ति५
समुदायस्यातिवक्षितं तृकारः। न वा हत्पक्षे आश्रीयते। किं तर्हि तृचि परे तद्दृष्टं चकिं च न निबंधनं तस्य सर्वातिदेशः। एवमपंगप्रकरणादं
गाधिकारविहितं यत्कार्यं तत्तदेवातिदिश्यते। न च विज्ञकेऽच्छमनांगं। यथा विण्वङावेनहृद्यादीन्येव भवंति। न तु मिङादेशास्ततश्चरप
रत्वमनतिदिष्टं स्यात्। रपरत्वमप्यांगं। कथं। कार्यकालं संज्ञापरिभाषं। सतोडि सर्वनामस्थानयोर्गुणो भवति ऋ पुल्लिंगमिदं भवति ऋर् अणपर इति।
स्त्रियां वेत्यत्र नहि क्रोष्ट्रीत्यत्र नांगयोरीकारयणोरतिदेशो न स्यात्। व च ना दुर्विष्यति। न तृज्वंतस्य स्त्रियामांगं कार्यं वदति। स्त्रियामप्यांगमसौ। पं
चभिः क्रोष्टृभिः क्रोष्टोः रथः पंचकर्तृः पंचक्रोष्ट्रीरिति स्त्रीलिंगे कर्तृशब्देऽिसंबुद्धौ ऋदृशस्य गुणस्यातिदेशः स्त्रीत्वे चात्र संभवति। नहि संबुद्धौ ह्रस्व
क्रोष्टो क्रोष्टुरित्यनेन सिद्धमसंबुद्धावित्यधिकारात्। ओ वा विभाषा तृतीयादिष्वचीति विकल्पः स्यात्। स्यादेतत्। स्त्रियां वेत्यत्र नकिं वान्निमित्त

ता६ नि५

×नर ×त ×दे ×चा२ ×तत्रापि२ ×डो२ ×अति३

२७ मुपादीयते। ततश्च प्रागेवविंशतकुलतेः स्त्रियांवर्त्तइत्येवत्ऽं तस्य दृष्टस्यातिदेशः। नचतदांगं संभवतीति नांगस्यात्यतिदेश इति। एवमपि पंचभिःको २७
ष्टीभिः कौ नैर थैरित्यत्र नकथं दहऽ तत्तद्रूपसूत्राद्युत्पन्नैः संभवेद्वृत्ति। तथाविभात्ततीयादिष्वपीत्यत्रापि कोष्टरीत्यांगस्य गुणस्यातिदेशात्
संभवात्कोष्टोः क्रोष्टुरितिपणशास्त्रमुत्तरशास्त्रेणानांगंनातिदिश्यते। नापिस्वरः। ननु तृतीयादिग्रहणसामर्थ्यादनांगमपिदिश्येत।
अपि न्यथाविभाषान् विशेषवक्ष्यबूयात्। नैतदस्ति। अभावातिदेशार्थं तृतीयादिग्रहणंस्यात्। वतिनिर्देशोयं भावातिदेशस्यदृष्टत्वात्। य
थामरुन्मूलिवदस्मिन्ग्रामेऽमात्। आत्वापि तृतीयादिषु भाषितपुंस्कमित्यत्र नुमन्चयोरभावोतिदिश्यते। यद्यपि वत्यासत्तेरांगम
वातिदिश्यतेइति स्थितिः। तदानसर्वास्तु तृतीयादिषु भावातिदेशः संभवतीतियस्य शास्त्रस्य भावस्तऽतेदृष्टस्तस्यैवतेपि तस्य भावाति
दिश्यते। यस्यत्वभावस्तऽंतेनुन्तेपि तस्याभावस्यातिदेशः स्यात्। ततश्च क्रोष्टुक्रोष्टा इत्यत्राधिकल्कस्तृणयोर्गुणनौ भावयोरभावोऽति
दिष्टः स्यात्। तदेवं शास्त्रातिदेशस्य बहुच्छिद्रत्वाद्रूपातिदेश एवायमाश्रयणीयः। तदाह। रूपातिदेशोयमिति। यद्येवं यस्यकस्यचित्तृऽं
तस्यरूपमतिदिश्येत पृक्तावकेति। तत्राह। प्रत्यासत्तेरिति। अथैतस्मिन्नरूपातिदेशपक्षे योगस्समवायियद्रूपं कोष्टारौ पंचक्रो
ष्टीभीरथैः क्रोष्ट्रि क्रोष्टा क्रोष्टुः को ष्टरीति। सावाकारांतं दिवचनो दीर्घआरंतं स्त्रियांकृविडेक्रांतं कविदकारांतं

४स्स४

तृतीयादिषु रेफान्तं । डुसिडुसोरुरं तं ऽनवरंतमिति न दृतिदि दृश्यते । आहोस्विच्छास्त्रीयं यद्रूपं खुब्छ्रँ त्वौ त्वं ऽवक्रोरि त्यपदेशावाक्येऽतिदे
शावाक्यवशकृतं न तदृतिदि दृश्यते । तत्राद्यपक्षेतु दातृपणा हलुझ्र वीदिति स्वरो न सिध्यति नस्त्रिक्रोष्टुना तृच्कारावस्थादद्याय तो यमुदात्त यणः स्यात् । तस्मात्
द्वितीयपक्ष आश्रयणीयस्तदा तृतवक्रोष्टुरिति दितिं । न त्वत्रापि पक्षेऽदात्तिवाक्येऽतिदेशावाक्यं तृ शब्दस्योदात्तस्योच्चारणाभावादुच्चारितस्य वा गुणा
नामसंदेना किंचित्करत्वात् स्वरस्यातिदेशो न स्यात् तृचकारग्रहणसामर्थ्यात् स्यादतिदेशो भविष्यति । तर्हि दा ह । अंतोदात्तत्वमि ति । यद्दामान्नं
स्वरस्यातिदेशः स्तृ ऽनंतरूपे तदिष्टं यथा त्वं ऽवुच्चादीचीदीनि स्वेन स्वेन शास्त्रेण भवंति । स्वरोप्येवमेव भविष्यति । वतिनिर्देशावायमतिदेश
आश्रितः । यदि तु वतिनिर्देशमकृत्वा स्थान्यादेशभावमाश्रीयेत् । नकिंचिदनिष्टं तथा तु न कृतमित्येव । ॥ स्त्रियां च ॥ क्रोष्टुशब्दस्तृ ऽज्वद्
वतीति । अर्थकथनमेतत् । वत्यंतं तु सुकं पठितुं । अन्ये त्वेन तृथपर्यालोचन न्यायात् स्वे सूत्रेपि क्रोष्टुरिति प्रथमांतं मन्यंते । अनुक्रियमाणं हि रूपं विनापि शब्द
संगात् तृऽज्वद्भावो न कृतः । वतिरपि तृतीयासमर्थादेव । तृऽनं तेन तुल्यं वर्त्तत इति । तद्रूपभाक्त्वेन तुल्यत्वमिति । रूपातिदेशत्वं । एवं बहुवर्त्म सूत्रे व्याख्यं
येतस्येति न पठितव्यं । तृऽनंतस्य यद्रूपं तदस्य भवतीत्येतत् स्वार्थकथनं । अत्र यदि विभक्तौ वित्यनुवर्त्तेत क्रोष्टुभिः क्रिः स्यादिति बहुव्रीहौ भक्ति शब्दस्य
स्त्रियादिषु पाठात् तु व.ऽ. क्रोष्टुभक्तिरिति न सिध्यति । समासार्थायां विभक्तौ लुप्तं मतात्सु प्रसात् । अथवा क्या वस्थ स्थापामेव तृऽज्वद्भावो भविष्य
ति । अंतरंगत्वात् गानपि विधीन् बहिरंगो ऽलुक् बाधते । तस्मात् त्रावृत्किं निमित्तत्वेन शक्या श्रयितुं । किं तर्हि निमित्तमित्याह । कथ्यादित्यादि ।

वाभावे २

४सु.

हपंचकोष्टरितिंतथा ५ य

×चा६ ×पु१ ङीष्प्रत्ययो निमित्तं भवति। स्त्रियामिति नेवं विज्ञायते स्त्रियामर्थ इति। कथं तर्हि स्त्री ई स्त्रीत्वस्य द्योतको य इकारस्तत्रेत्यर्थः।
कथं तर्हि पुनर्गौरादिपाठे स्त्रियामिति नदीसंज्ञानिमित्ता वाँमा गामोटाक्रियते। एवं वदता मनिष्माह। तेषामिति। पंचकोष्ठभिरिति। त
अर्थगतं व स्त्रीत्वमिकार ओराया स्त्रियामिति नदीसंज्ञा लुकीति स्त्रीप्रत्ययस्यापि लुक्। तत्र न लुमतांगस्येति प्रतिषेधादिकारो निमित्तं स्यादे ३०
द्विता र्थसमासः। आर्तीपस्य ठकोऽर्थ्यर्थ पूर्वेति लुक्। लुकू तद्धित लुकीति स्त्रीप्रत्ययस्यापि लुक्। तत्र सर्वनामस्था ने पूर्वेणि वत्‌ऽवङ्वत् सिद्ध इति द्वितीयादिवि
३० द्वावापि न सिद्ध्यति। अंतरंगाणां वर्त्विधीनां लुकावा धना न्यहर्वमेवत्‌ऽवङ्वा लभ्यते तत्र सर्वनामस्थाने पूर्वेणि वत्‌ऽवङ्वत् सिद्ध इति द्वितीयादिषु ङ्‌ादिषु पि उत्तरस्त्रेण विकल्पः प्राप्नोति। पंचकोष्ठा। पंचको
सिद्धिरुक्ता। सर्वनामस्थाने पि संबुद्धौ पूर्वैस्त्रेणासिद्धिरेव पंचकोष्ठून्रा न थात्‌ तीयादिषु ङ्‌ादिषु पि उत्तरस्त्रेण विकल्पः प्राप्नोति। तत्र प्रति विधेयमिति। वचनमेवात्र शरणं।
३० पुनेति। नाचारवे पस्मिन्नपरत्वादिकल्पएवप्राप्नोति। अंतरंगत्वाद्यमनित्यो विधिर्भविष्यति। सूत्राक्षरानुरोधेन वशाद्वः पठितः। ननु वयध
यतर्हि गौरादिषु न पठंतितेषां किं निमित्तं। नकिंचिदित्याद्‌। पेलित्यादि। स्त्रियां वर्तमानइति। सूत्राक्षरानुरोधेन वशाद्वः पठितः। ननुवयध
यतर्हि गौरादिषु न पठंति तेषां किं निमित्तं। अंगस्येति त्वाश्रीयते। अंगे वाश्रिते प्रत्ययो प्याश्रितएव। यथा क्रमंगस्येत्यत्र वचने त्यादिस्त्रसिद्धौ द्वये। स त्यं का
पिनरो हे न किं च न्निमित्तमाश्रीयते। अंगस्येति त्वाश्रीयते। अंगे वाश्रिते प्रत्ययो प्याश्रितएव। तत श्च प्रत्यय इत्यस्यांगसंज्ञामुरदंत स्यैत्वं वचति निमित्तभावः। स न्नि दे
भा८ र्यकाल्वे संज्ञापरिषेकं तदुक्तं। तत्रहि एक्तेज्ञदित्यत्रांगसंज्ञास्त्रे मुपात्तस्तते। ततश्च प्रत्यय इत्यस्यांगसंज्ञामुरदंतस्यैत्वं वच्यतिनिमित्तमावः। ननुपरंनिमित्तमाश्रीयते।
रविवक्षितत्वात्। हइत्‌तु यथोद्देशपक्ष आश्रीयते। ततश्च वस्तुतोंगस्य स्त्रियां वर्तमानस्य कोष्टुशब्दस्यत्‌ऽवङ्वा बोधी धीयते। नवांगसंज्ञांगस्य कार्य। अं
अंगसंज्ञा वप्रत्ययपल्दे लक्षणे न भवति। अंगस्येति वचना ल्लक्षणं गसंशय्य यत्कार्यं प्रत्ययलक्षणेनं तदेव प्रतिबिद्धयते। नवांगसंज्ञांगस्य कार्यं। अं

×ष्य१

× श्री १ तृ १

तोदात्त एव क्रोष्टुशब्दो भवतीति। गौरादिपाठे ङीष्प्रत्यये स्वरेणान्तोदात्तः। अत्रापि पक्षे तृज्वद्भावे हलन्त एवादित्यन्तोदात्त एवेत्येव शब्दार्थः। स्य २
केचित्तु ङीषं प्रोदात्तमुदात्तं पणइत्येवोदात्तत्वमितरथा ङीबि परत्वात् तृज्वद्भावे यस्वरे सति शिष्टत्वेन ङीपोऽनुदात्तत्वप्रसंगा
दित्याहुः॥ ७॥ विभाषा तृतीयादिष्वचि॥ ७॥ अत्रापि विभाषेयं। स्त्रियामिति नानुवर्त्तते। पंच क्रोष्टुत्यादावंतरंगत्वात्पूर्वं णिनित्यस्तृज्व
द्भावो भवतीत्यवोचाम। तेनोभयत्रविभाषा पचिन भवति। पूर्वविप्रतिषेधेनेति। तृज्वद्भावस्यावकाशः। क्रोष्टुपुंसा नुमो नुडोरवका
शोऽनुने त्रपुणे अग्नीनाम् वायूनां [illegible] प्रियक्रोष्टुनेत्यादावुभयप्रसंगे पूर्वविप्रतिषेधः। अथ किमर्थं तृज्वद्भावो विधीयते यावता
कुरोरेवत्व विक्रोष्टरित्यादिसिध्यति। तुन्नंतस्यासंबुद्धौ सर्वनामस्थाने स्त्रियां च प्रयोगो मा भूत्। तृजंतस्यैव यथा स्यात्। विभाषा तृ
तीयादिष्वचीत्यत्र तर्हि किमर्थं। तृजंतस्य क्रोष्ट्रेत्यादि सिद्धं। तुन्नंतस्य क्रोष्टुनेत्यादि। यद्येतर्हि जातु उभयं भवति। तथा हलादावपि स्या
त्। एवं शास्त्रस्यापि। तुन्नंतस्यैव वर्त्तते प्रयोगद्यते। तेन तद्रूपि कैनियमार्थं तृतीयादावेवोभयं तत्राप्यजादावेवेति। परस्तु मन्यते अनि
धानस्वाभाव्यादेव तुन्नन्तो व्यवस्थितविषयः प्रयोग इति तं प्रति सूत्रत्रयमपि शक्यमकर्त्तुं॥ ७॥ चतुरनडुहोरामुदात्तः॥ ७॥ अत्र सर्वना
मस्थान इति स्वर्यते। न तृतीयादिष्विति। आगमानुदात्तत्वस्य बाधनार्थमुदात्तवचनं। तदंविधिरत्र न भवति इति। अंगाधिकारे तस्य त

×दीर्घलेट्नेऽ४ ×ष्य४

दुत्तरपदस्य चेति वचनात्। ञियच त्वादिति। बहुव्रीहौ सर्वनाम ~~स्थ सं ख्यायोः स्य~~ संख्यायोरूपसंख्यानमिति चतुरशब्दस्य पूर्वनिपा
पर ते प्राप्ते बाधित्वा प्रियस्येति प्रियशब्दस्य पूर्वनिपातः। छ। अम् संबुद्धौ। छ॥ चतुरशब्दस्य केवलस्य संबुद्ध्यसंभवादुपसर्जनस्यैवास्योदा
हरणं। अनडुहः स्त्र प्रक्रमाभेदाय। तदंतविधिरत्रेष्यत इति। प्रदर्शनाय चतुरंदंतस्योदाहरणं॥ अनडुहः स्त्र प्रक्रमाभेदाय तदंतविधिरित्यत्रे ३१
३१ इति प्रदर्शनाया चतुरंदंतस्योदाहरणं। छ॥ ऋत इद्धातोः। छ॥ मातॄणां इति। ननु बहिरंगलक्षणि कृत्वा इत्वात्र न भवति। यत आह। लाक्षणिकस्यापीति प्र
31 ज्ञयोजनं इत्याह। चिकीर्षतीति। अतस्तदर्थं धातुग्रहणमिति भावः। कश्चित्तु एतावदेव न पठ्यते। छ। उपधायाश्च। छ॥ एवं णरू ऋकारांतस्य धौरित्वं ×तो५
उक्तं उपधाया अपि यथा स्यादित्ययमारंभः। न तु च एवं योगे धातुना ऋकारं विशेषयिष्यामः। धातोर्य ऋकारो पदं तत्र स्थ इति। इहापि तर्हि प्राप्नो
ति ऋकारमिच्छति ऋकारीयतीति एवमपिकृत स्थानीयतासि ह। ऋत इत्यस्यानुवृत्ते रंतस्य न भविष्यति। तथा तु नहूतमित्येव। कीर्त्यतीति। कृतसं
शब्दने। चुरादिः। छ॥ उदोष्ठ्यपूर्वस्य। छ॥ निपृतीं इति। पृपालनपूरणयोः। नष्टाख्या पूरणं तच्छिँ मदामिति निष्ठानत्वप्रतिषेधः। मुमूर्षतीति। मृङ् प्राण
त्यागे। स्तु स्तूर्षतीति। स्मृ चिंतायां। स्पृ स्पूर्षतीति पाठे स्पृशब्दो पतापयोः स निवृत्तं ह्येताहिने उ भावपक्षे रूपं। एवं एवं तु युक्तः पाठः। पृथगुदा
हरणस्य वक्ष्यमाणत्वात्। दंतोष्ठ्यपूर्वस्यापि प्रोतादि। ओष्ठ्यतया गोत्र विवक्षितः। नेतरथा वृत्तिरिति भावः। ओष्ठ्यात्ते त्यादि। यथा हलन्तइ
×कि रतिगिरतीति। कृ विक्षेपे। गृ निगरणे तुदादी। आस्तीर्णं विस्तीर्णमिति। स्तृञ् आच्छादने। शृ हिंसायां। ऋ [illegible] दीर्घः। रदाभ्यामिति निष्ठानत्वं। ७४
त्री

यत्रांगेन हल्लिशोष्यते। तेन संप्रसारणं। ते मैव पुनरंगं तथा त्रापि अंगस्यावयव ओष्ठः पूर्वोय स्मात्तदंतस्यांगस्येति। इत्वोत्वाभ्यामित्या
दिः इत्वोत्वयो द्वित्वितान्यक उदाहरणान्युवकाशः। गुणश्च खारवकाशश्च यनं। सायकः। उभयत्र संगविप्रतिषेधः। आस्तरणमिति। ना
त्र रणा गुणस्य नित्यत्वं। लक्षणभेदोत्त्वं हीगं तल्लक्षणो गुणः प्राप्नोति इत्वोत्वे कृते लघूपधगुणः। छ।। बहुलं छंदसि। छ।।। ननु रिङ् गुरि
रिति। दृद्द भ्यामादृगमदन्तेति कि न्नत्ययपः। उ तं। तस्य द्विर्वचने वीति स्थानिवद्भावात् दृद्द इत्यस्य द्विर्वचनम्। उरदत्वं। पवित्रनामेति। पूइत्येतस्मा
उत्तरं वं वत्तरकिन्न। इत्वोत्वाभावे यण्। तस्य स्थानिवद्भावाद्विर्वचनं। अतिशायने तमप्।। छ।। ।।छ।।। छ।। श्रीः छ।। इति श्री हरिदत्तमिश्रविरचिता
यां पदमंजर्यां सप्तस्याध्यायस्य प्रथमः पादः संपूर्णः।। छ।। श्रीगणेशायनमः।। ।।छ।। श्रीवागीश्वर्यै नमः। सिचि वृद्धिः परस्मैपदेषु।।
अत्र सिचि परस्मैपदेष्विति द्वे अपि परसप्तम्यौ। तत्र सिचांगापेक्षं परत्वं परस्मैपदानां सिजपेक्षं। इको गुणवृद्धीति वचनादिक इत्यपतिष्ठ
ते। तत्रैकांगस्य विशेषणा तदंतविधिर्भवति। त्यिादइंगं तस्यांगस्येति। उदाहरणे अचैषीत्। अस्तासिचोप्ष्टत् इतीटनिषः। सेटः सिवृदि ईटीति
लोपः। ननु चांतभूतत्वात्सिज्ञापेक्षत्वात् गुणोंतरंगः बाति भूतं परस्मैपदं सिजं वापेक्षत इति वृद्धिर्बहिरंगा तत्रश्च पूर्वं गुणेन
तः इगंतस्यांगस्येति नोपपद्यत इत्यत आह। अंतरंगमपीति। यथैव नादि गुणं बाधते तथा वङमपि बाधते तत्राह न्यतु वीतेन्य धुवी

त्रै ४ बा ३ ति १ ×दा २

दित्यत्रैति । एतस्कृतो । त्रविधूनने । कुटादीयत्रासिद्धिः । अवत्तिनेतत्रां तरंगं बाधते इहतु अपेक्षादत्र हता सतिनो सेते बाधितुं । ननु च यथा
गुणो बाध्यते एवं प्रतिशेषोपि बाधनीयः । न बाधनीयः । येन नाप्राप्ते तस्य बाधनं नवति । गुणो नाप्राप्ते वृद्धिरारभ्यते । प्रतिशेषे तु प्राप्ते वा प्राप्ते
वेति । अथैवं कस्मान्न कल्प्यते ॥ अंतरंगाद्गुणे कृते वचनादनिको वृद्धिर्नवति । अचेवीदित्यादावेकारस्यापि हावीदित्यावेकारस्येति । तत्रायमप्ययं
। स्य कृणो वचनात्सिद्धिः । कृणां न कर्तव्यं नवति कथमोनयीदत्र यीदित्यादावंतरंगत्वाद्गुणायादेशयोः कृतयोर्यतानां नेयेव प्रतिषेधः
सिद्धः । नैवं शक्यं कल्पयितुं । एवंहि कल्पमाने अजेसीदित्यादौ व्यंजनांतस्यापि वृद्धिप्रसंगः । वदव्रजहलंतस्याचइत्यपवादो व्यंजनांतस्य वृद्धि
बाधिष्यते । नाप्राप्तायां तस्यामारंभात् । यत्र तर्हि सा प्रतिषिध्यते । अदेवीदित्यादौ तत्र व्यंजनस्य मित्विवृद्धिः प्राप्नोति । नेष दोषः । नेटीत्यने
नहलंतस्य योदित्यावारभ्यिवीतस्य गात्रानुस्वारसिविवृद्धिः प्राप्नोति । अत्रापि तरंगत्वादवादेशे कृते हलंतलक्षणा यानेटीति प्रतिषेधः । अतोल्ल
देर्लघोरितीं विकल्पः कस्मात्पयिसि विवृद्धिरित्यलक्षणवेनवति । इहतर्हि न्यवीनायवीदिति । कुतिरिति प्रतिषेधान्नवाप्नोति । अनिल लक्षणा
रम्भात्पूर्वप्राप्ति प्रयेवः । अंतरंगत्वादुवडादेशात्तावेष्यति । इहतु आकार्षीदिति गुणकृते हलंतलक्षणा वृद्धिः यत्रापि प्रतिषिध्यते अतारीदस्तारीदि
तत्राप्यतोल्लांतस्येति सिद्धा वृद्धिः । इहतत्युपावीदपावीत् । अंतरंगत्वाद्गुणावादेशयोः कृतयोर्हलंतलक्षणायानेटीति प्रतिषे

× यावनीवृद्धिः प्राप्नोति । वदव्रजेति सिविवृद्धिरिति प्रतिषिध्यते इहतु अगवी ४ ३२